रित्यवि। चाचलिः। विशस्त्वा। त्वा सर्वाः। सर्वा वाञ्छन्तु। वाञ्छन्तु

मा। मा त्वत्। त्वद्राष्ट्रम्। राष्ट्रमधि। अधि भ्रशत्। भ्रशदिति भ्रशत्

॥ उदुत्तमम्। उत्तमं वरुण। उत्तममित्युत्तमम्। वरुण पाश

म्। पाशमस्मत्। अस्मदवा। अवाधमम्। अधमं वि। वि मध्यमम्।

मध्यमं श्रथाय। श्रथायेति श्रथाय। अथा वयम्। वयमादित्य। आ

९५

दित्य व्रते । व्रते तव । तवानागसः । अनागसोऽदितये । अदित
ये स्याम । स्यामेति स्याम ॥२ अग्रे बृहन् । बृहन्नुषसाम् । उषसामू
र्ध्वः । ऊर्ध्वोऽस्थात् । अस्थान्निर्जगन्वान् । निर्जगन्वान्तमसः ।
निर्जगन्वानिति निः । जगन्वान् । तमसो ज्योतिषा । ज्योतिषागा
त् । अगादित्यगात् । अग्निर्भानुना । भानुना रुशता । रुशता स्व
ङ्गः । स्वङ्ग आजातः । स्वङ्ग इति सुऽअङ्गः । आजातः । जातो वि
श्वा । विश्वा सद्मानि । सद्मान्यप्राः । अप्रा इत्यप्राः ॥३ सीद त्वम् ।
त्वम्मातुः । मातुरस्याः । अस्या उपस्थे । उपस्थे विश्वानि । उपस्थ
इत्युपऽस्थे । विश्वान्यग्ने । अग्ने वयुनानि । वयुनानि विद्वान् । वि
द्वानिति विद्वान् । मैनाम् । एनान्तपसा । तपसा मा । मार्चिषा ।

सं

अग्निषाऽभि। अभि शोचीः। शोचीरन्तः। अन्तरस्याम्। अस्याᳪं शुक्रज्यो
तिः। शुक्रज्योतिर्वि। शुक्रज्योतिरिति शुक्र। ज्योतिः। विभाहि। भा
हीति भाहि ४४ अन्तरग्ने। अग्ने रुचा। रुचा त्वम्। त्वमुखायाः। उखा
याः सदने। सदने स्वे। स्वऽइति स्वे। तस्यास्त्वम्। त्वᳪं हरसा। हरसा
तपन्। तपञ्जातवेदः शिवः। जातवेद ऽइति जात। वेदः। शिवो भ
व। भवेति भव ४५ शिवो भूत्वा। भूत्वा मह्यम्। मह्यमग्ने। अग्ने अथो। अथो
अथो सीद। अथोऽइत्यथो। सीद शिवः। शिवस्त्वम्। त्वमिति त्व
म्। शिवाः कृत्वा। कृत्वा दिशः। दिशः सर्वाः। सर्वाः स्वाम्। स्वां योनिम्। यो
निमिह। इहासदः। आसदः। असदऽइत्यासदः ४६ दिवस्परि।
परि प्रथमम्। प्रथमञ्जज्ञे। जज्ञे अग्निः। अग्निरस्मत्। अस्माद्वि

तीयम्। द्वितीयमिति। परिज्ञातवेदाः। जातवेदाऽइति जात। वेदाः। तृ
तीयमप्सु। अप्सु नृमणाः। अप्स्वित्यप्सु। नृमणाऽअजस्रम्। नृम
णाऽइति नृ। मनाः। अजस्रमिन्धानः। इन्धानऽएनम्। एनञ्जरते। जर
ते स्वाधीः। स्वाधीरिति सु। आधीः १७ विद्माते। तेऽअग्ने। अग्ने त्रेधा।
त्रेधा त्रयाणि। त्रयाणि विद्म। विद्माते। तेधाम। धाम विभृता। विभृ
ता पुरुत्रा। विभृतेति वि। भृता। पुरुत्रेति पुरु। त्रा। विद्माते। तेनाम।
नाम परमम्। परमङ्गुहा। गुहायत्। यद्विद्म। विद्मतम्। तमुत्स
म्। उत्सं यतः। यतऽआजगन्थ। आजगन्थेत्या। जगन्थ १८ समु
द्रे त्वा। त्वा नृमणाः। नृमणाऽअप्सु। नृमणाऽइति नृ। मनाः। अ
प्स्वन्तः। अप्स्वित्यप्सु। अन्तर्नृचक्षाः। नृचक्षाऽईधे। नृचक्षाऽइति

मे

न्‌। चक्षाः। ईधे दिवः। दिवोऽग्ने। अग्न ऊधन्। ऊधन्‌ तृतीये। तृतीये
त्वा। त्वा रजसि। रजसि तस्थिवांसम्। तस्थिवांसमपाम्। तस्थि
वांसमिति तस्थि। वांसम्। अपामुपस्थे। उपस्थे महिषाः। उपस्थ
ऽइत्युप। स्थे। महिषा अवर्द्धन्। अवर्द्धन्नित्यवर्द्धन्॥ ४॥ श्रीणामुदा
रः। उदारो धरुणः। उदार इत्युत्। आरः। धरुणो रयीणाम्। रयीणा
म्मनीषाणाम्। मनीषाणाम्प्रार्पणः। प्रार्पणः सोमगोपाः। प्रार्प
णऽइति प्र। अर्पणः। सोमगोपाऽइति सोम। गोपाः। वसुः सूनुः। सू
नुः सहसः। सहसोऽप्सु। अप्सु राजा। अप्स्वित्यप्। सु। राजा वि। वि
भाति। भात्यग्रे। अग्रऽउषसाम्। उषसामिधानः। इधानऽइतीधा
नः॥ ५॥ विश्वस्य केतुः। केतुर्भुवनस्य। भुवनस्य गर्भः। गर्भऽआरो

१०७

दसी। आरोदसी। रोदसीऽअपृणात्। रोदसीऽइति रोदसी। अपृणा
ज्जायमानः। जायमानऽइति जायमानः। वीडुच्चित्। चिदद्रिम्। अद्रि
मभिनत्। अभिनत्परायन्। परायञ्जनाः। परायन्निति पराऽयन्। जना
नायता। यदग्निम्। अग्निमयजन्त। अयजन्त पञ्च। पञ्चेति पञ्च ॥ १ ॥ उशि
क्पावकः। पावकोऽअरतिः सुमेधाः। सुमेधा मर्तेषु। सुमेधाऽइति
सुऽमेधाः। मर्तेष्वग्निः। अग्निरमृतः। अमृतो नि। नि धायि। धायीति धा
यि। इयर्ति धूमम्। धूममरुषम्। अरुषम्भरिभ्रत्। भरिभ्रदुत्। उच्छु
क्रेण। शुक्रेण शोचिषा। शोचिषा द्याम्। द्यामिनक्षन्। इनक्षन्नि
तीनक्षन् ॥ २ ॥ यस्ते। तेऽअद्य। अद्य कृणवत्। कृणवद्भद्रशोचे।
भद्रशोचेऽपूपम्। भद्रशोचऽइति भद्रऽशोचे। अपूपन्देव। देवघृत

सं

वन्नम। हृतवन्नमग्ने। हृतवंन्नमिति हृत। वन्नम॥ अग्नेऽइत्यग्ने। यतस्व

तद्वप। नयप्रतरम। प्रतरं वस्यः। प्रतरमिति प्रऽतरम्। वस्यः। अच्छ। अ

च्छाभि। अभिसुम्नम्। सुम्नं देवभक्तम्। देवभक्तं यविष्ठ। देवभक्तमि

ति देव। भक्तम्। यविष्ठेति यविष्ठ २३ आतम्। तद्भज। भजसौश्रवसे

षु। सौश्रवसेष्वग्ने। अग्नऽउक्थे। उक्थेऽउक्थऽआ। आभज। उक्थऽउक्थऽइत्यु

क्थे। उक्थे। आभज। भजशस्यमाने। शस्यमानऽइति शस्यमाने। प्रि

यः सूर्ये। सूर्ये प्रियः। प्रियोऽअग्ना। अग्ना भवाति। भवास्युत्। उज्जा

तेन। जातेन भिनदत्। भिनदद्त्। उज्जनित्वैः। जनित्वैरिति जनि।

त्वैः २४ त्वामग्ने। अग्ने यजमानाः। यजमानाऽअनु। अनुद्यून्। द्यू

न्विश्वा। विश्वावसु। वसुदधिरे। दधिरेवार्य्याणि। वार्य्याणीति वा

108

धीमहि। त्वया सह। सह द्रविणम्। द्रविणमिच्छमानाः। इच्छमाना व्रज
म्। व्रजं गोमन्तम्। गोमन्तमुशिजः। गोमन्तमिति गो मन्तम्। उशिजो
वि। वि वव्रुः। वव्रुरिति वव्रुः॥ २५॥ अस्ताव्यग्निः। अग्निर्नराम्। नराꣳ सु
शेवः। सुशेवो वैश्वानरः। सुशेव इति सु शेवः। वैश्वानर ऋषिभिः। ऋ
षिभिः सोमगोपाः। ऋषिभिरित्यृषि भिः। सोमगोपा इति सोम गोपाः।
अद्वेषे द्यावापृथिवी। अद्वेषे इत्यद्वेषे। द्यावापृथिवी हुवेम। द्यावापृ
थिवी इति द्यावापृथिवी। हुवेम देवाः। देवा धत्त। धत्त रयिम्। रयिम
स्मे। अस्मे सुवीरम्। अस्मे इत्यस्मे। सुवीरमिति सुवीरम्॥ २६॥ उद्गता।
ऊँ इत्यूँ। माहिषे। विश्वे देवाः। देवा अग्ने। अग्ने भरन्त। भरन्त चित्ति
भिः। चित्तिभिरिति चित्ति भिः। स नः। नो भव। भवा शिवः। शिवस्तम्।

मं

त्वं सुप्रतीकः। सुप्रतीको विभावसुः। सुप्रतीक इति सु प्रतीकः। विभा
वसुरिति विभा। वसुः ९७ प्रेत। इद्धो अग्ने ज्योतिष्मान्। ज्योतिष्मान्या
हि। याहि शिवेभिः। शिवेभिरर्चिभिः। अर्चिभिष्ट्वम्। अर्चिभिरित्यर्चि। भिः
त्वमिति त्वम्। बृहद्भिर्भानुभिः। बृहद्भिरिति बृहत्। भिः। भानुभिर्भासन्।
भानुभिरिति भानु। भिः। भासन्मा। माहिंसीः। हिंसीस्तन्वा। तन्वा
प्रजाः। प्रजा इति प्रजाः ९८ प्रप्रायम्। प्रप्रेति प्र प्र। अयमग्निः। अग्नि
र्भरतस्य शृण्वे। शृण्वे वि। वि यत्। यत्सूर्यः। सूर्यो न। न रोचते। रोचते
बृहत्। बृहद्भाः। भा इति भाः। अभि यः। यः पूरुम्। पूरुम्पृतनासु। पृ
तनासु तस्थौ। तस्थौ दीदाय। दीदाय दैव्यः। दैव्यो अतिथिः। अति
थिः शिवः। शिवो नः। न इति नः ९९ आपो देवीः। देवीः प्रति। प्रति

109

गृह्णीत । गृह्णीतमस्मा । अस्मैनेनत् । एनत्स्योने । स्योनेकृणुध्वम् । कृणुध्व
म् ॥ स्वरभौ । स्वरभाऽउलोके । उ लोकेऽस्मिन् । लोकऽइति लोके । नसेनमत्ता
म् । नमत्ताजनयः । जनयः सुपत्नीः । सुपत्नीर्मातेव । सुपत्नीरिति
सुपत्नीः । मातेवपुत्रम् । मातेवेतिमाताऽइव । पुत्रम्बिभृता । बिभृता
प्सु । अप्स्वेनत् । अप्स्वित्यप्सु । एनदित्येनत् । १० अप्स्वग्ने । अप्स्वित्य
प्सु । अग्नेसधिः । सधिष्टव । तवसः । सौषधीः । ओषधीरनु । अनुरुध्य
से । रुध्यसऽइतिरुध्यसे । गर्भेसन् । सञ्जायसे । जायसेपुनः । पुनरि
तिपुनः ॥ ११ ॥ गर्भोऽअसि । असिओषधीनाम् । ओषधीनाङ्गर्भः । गर्भोव
नस्पतीनाम् । वनस्पतीनामितिवनस्पतीनाम् । गर्भोविश्वस्य । वि
श्वस्यभूतस्य । भूतस्याग्ने । अग्नेगर्भः । गर्भोऽअपाम् । अपामसि । असीति

सं

नि २२ प्रसद्य भस्मना। प्रसद्येति प्रऽसद्य। भस्मना योनिम्। योनिमपः। अप
श्च। च पृथिवीम्। पृथिवीमग्ने। अग्न इत्यग्ने। सं ऽसृज्य मातृभिः। संसृज्ये
ति सम्। सृज्य। मातृभिष्ट्वम्। मातृभिरिति मातृऽभिः। त्वं ज्योतिष्मान्। ज्यो
तिष्मान्पुनः। पुनरासदः। आसदः। आसद इत्याऽसदः २३ पुनरासद्य।
आसद्य सदनम्। आसद्येत्याऽसद्य। सदनमपः। अपश्च। च पृथिवीम्।
पृथिवीमग्ने। अग्न इत्यग्ने। शेषे मातुः। मातुर्यथा। यथोपस्थे। उप
स्थेऽन्तः। उपस्थ इत्युपऽस्थे। अन्तरस्याम्। अस्यां शिवतमः। शिव
तम इति शिवऽतमः २४ बोधा मे। मे अस्य। अस्य वचसः। वचसो यवि
ष्ठ। यविष्ठ मंहिष्ठस्य। मंहिष्ठस्य प्रभृतस्य। प्रभृतस्य स्वधावः। प्र
भृतस्येति प्रऽभृतस्य। स्वधाव इति स्वधाऽवः। पीयति त्वः। त्वो अनु।

श्नुवः। त्वो। हृतानि। हृतानीति वृत्राकः। वृत्राहऽइ। तेन। तन्त्वम्। नन्त्वंव
र्दे। वृदेऽग्रग्रे। अग्रऽइत्यग्रे॥ २५ स बोधि। बोधि। सूरिः। सूरिर्मघवा। मघ
वा। वसुपते। मघवेति मघऽवा। वसुपते। वसुदावन्। वसुपतऽइति वसु।
पते। वसुदावन्निति वसु। दावन्। युयोधि। अस्मत्। अस्मद्द्वेषांसि। द्वेष
ांसि। विश्वकर्मणो। विश्वकर्मणे स्वाहा। विश्वकर्मणऽइति विश्व। कृ
र्मणे। स्वाहेति स्वाहा॥ २६ पुनस्त्वा। पुनरिति पुनः। त्वादित्याः। आदि
त्याः। रुद्राः। रुद्रा वसवः। वसवः। सम्। समिन्धताम्। इन्धताम्। पुनः। पु
नर्ब्रह्माणः। ब्रह्माणो व। सुनीथ। वसुनीथ यज्ञैः। वसुनीथेति वसु।
नीथ। यज्ञैरिति यज्ञैः। घृतेन। त्वम्। तन्वम्। तन्वं वर्धयस्व। वर्ध
यस्व सत्याः। सन्तु। सन्तु। यजमानस्य। यजमानस्य कामाः। कामाऽइति

से कामाः ॥ ३७ ॥ अपेत । इति । वि । वीत । इति । वि । वि । च । च सर्पत । सर्पतातः । अ
नेये । येत्र । अत्र स्थ । स्थ पुराणाः । पुराणा ये । ये च । च नूतनाः । नूतनाः
इति नूतनाः । अदात् यमः । यमो वसानम् । अवसानं पृथिव्याः । अवसा
नमित्यव । सानम् । पृथिव्याः अक्रन् । अक्रन्निमम् । इमम्पितरः । पि
तरो लोकम् । लोकमस्मै । अस्मा इत्यस्मै । ३८ संज्ञानमसि । संज्ञान
मिति सम् । ज्ञानम् । असि कामधरणम् । कामधरणं मयि । काम
धरणमिति काम । धरणम् । मयि ते । ते कामधरणम् । कामधरण
म्भूयात् । कामधरणमिति काम । धरणम् । भूयादिति भूयात् ।
अग्नेर्भस्म । भस्मासि । अस्यग्नेः । अग्नेः पुरीषम् । पुरीषमसि । अ
सि चितिः । चितः स्थ । स्थ परिचितः । परिचितः ऊर्ध्वचितः । प

रिचित इति परिऽचितः। ऊर्द्धचितः श्रयध्वम्। ऊर्द्धचित इत्यूर्द्धऽचि
तः। श्रयध्वमिति श्रयध्वम्। २१ ५ अयं सः। सोऽग्निः। अग्निर्यस्मिन्।
यस्मिन्त्सोमम्। सोममिन्द्रः। इन्द्रः सुतम्। सुतन्दधे। दधे जठरे। जठरे
वावशानः। वावशान इति वावशानः। सहस्रिणं वाजम्। वाजमत्यम्।
त्यम्। अत्यन्न। न सप्तिम्। सप्तिं ससवान्। ससवान्त्सन्। ससवानि
ति ससऽवान्। सन्त्स्तूयसे। स्तूयसे जातवेदः। जातवेद इति जात
ऽवेदः॥ ५॥ अग्ने यत्। यत्ते। ते दिवि। दिवि वर्चः। वर्चः पृथिव्याम्। पृथि
व्यां यत्। यदोषधीषु। ओषधीष्वप्सु। अप्स्वा। आ यजत्र। अप्स्वित्यप्ऽसु। आ।
यजत्र। यजत्रेति यजत्र। येनान्तरिक्षम्। अन्तरिक्षमुरु। उर्वाततन्थ।
आततन्थ त्वेषः। आततन्थेत्याऽततन्थ। त्वेषः सः। स भानुः। भानुर

सं

णिरः। अर्णवोनक्षत्राः। नक्षत्राऽइतिनक्षत्राः ४८ अग्नेदिवः। दिवोऽ
अर्णम्। अर्णमच्छ। अच्छाजिगासि। जिगास्यच्छ। अच्छादेवान्। देवाँऽ॥
ऊचिषे। ऊचिषेधिष्ण्याः। धिष्ण्याये। यऽइतिये। यारोचने। रोचनेपरस्तात्।
परस्तात्सूर्यस्य। सूर्यस्ययाः। याश्चावस्तात्। अवस्तादुपतिष्ठन्ते।
उपतिष्ठन्तआपः। उपतिष्ठन्तऽइत्युप। तिष्ठन्ते। आपऽइत्यापः ४९
पुरीष्यासोऽअग्नयः। अग्नयःप्रावणेभिः। प्रावणेभिःसजोषसः।
प्रवणेभिरितिप्रवणेभिः। सजोषसऽइतिस। सजोषसः। जुषन्तां
यज्ञम्। यज्ञमद्रुहः। अद्रुहोऽनमीवाः। अनमीवाऽइषः। इषोम
हीः। महीरितिमहीः ५० इडामग्ने। अग्नेपुरुदꣳसम्। पुरुदꣳ
सꣳसनिम्। पुरुदꣳसमितिपुरु। दꣳसम्। सनिंगोः। गोःशश्व

112

नमस्। शाश्वत्तमं ४८ हूयमानाय। शाश्वत्तममिति शाश्वत्। नमसा। हूय
मानाय साध। साधेति साध। स्याव्रः। नः। सन्तुः। सन्तु मतनयः। ननया
विजावा। विजावाग्ने। विजावेति विजावा। अग्रस्ता। ताने। नेस्तुमतिः।
सुमतिश्रुवा सुमतिं दिति सु। मतिः। मत्वस्मे। अस्मे ऽ इत्यस्मे ४४
विदासि। आसित या। तया देवतया। देवतयाङ्गिरस्वत्। अङ्गिरस्वद्
वा ध्रुवासीदासीदपरिचित। परिचित्कोकम। परिचिदिति परि।
चित् ४५ लोकं पृण। पृणाच्छिद्रमा। च्छिद्रं पृण। पृणाथो। अ
थो सीद। अथो इत्यथो। सीद ध्रुवा त्वं। वा त्वं सा। त्वमिति त्वं। इन्द्रा
ग्नी त्वा। इन्द्राग्नी ऽ इतीन्द्राग्नी। त्वा बृहस्पतिः। बृहस्पतिर
स्मिन्। अस्मिन्योनौ। योनावसीषदन्। असीमदाविन्त्यसीसद

सं

नु ४६ ताऽअस्य । अस्य सूददोहसः । सूददोहसः सोमम् । सूददोहस ऽइति सूदऽदोहसः । सोमं श्रीणन्ति । श्रीणन्ति पृश्नयः । पृश्नयऽइति पृश्नयः । जन्मन्देवानाम् । देवानां विशः । विशस्त्रिषु । त्रिष्वा रोचने । आरोचने । रोचने दिवः । दिवऽइति दिवः ४७ इन्द्रं विश्वाऽअवीवृधन् । अवीवृधन्त्समुद्रव्यचसम् । समुद्रव्यचसङ्गिरः । समुद्रव्यचसमिति समुद्रऽव्यचसम् । गिरऽइति गिरः । रथीतमं रथीनाम् । रथितममिति रथिऽतमम् । रथीनां वाजानाम् । रथीनामिति रथिनाम् । वाजानां सत्पतिम् । सत्पतिम्पतिम् । सत्पतिमिति सत्ऽपतिम् । पतिमिति पतिम् ४८ समितम् । इतं सम् । सङ्कल्पेथाम् । कल्पेथां सम्प्रियौ । सम्प्रियौ रोचिष्णू । सम्प्रियाविति सम् । प्रि

यो। यो विस्रुह समनस्यमानैः। यो वि। स्रु ऽ इति यो ति यो विस्रुः। स्रुमनस्य
मानाविति स्रु। मनस्यमानौ। नौ। इषमूर्जम्। ऊर्जमभि। अभिसंवसा
नौ। संवसानाविति सम्। वसानौ ४९ सन्वाम्। वामनाः ऽसि। मना
ऽसि सम्। सन्व्रता। व्रता सम्। सन्व्रतानि। ऊर्जम्। चित्ताकरम्।
आकरम्। अकरमित्यकम्। अग्ने पुरीष्य। पुरीष्याधिपाः। अधिपा भ
व। अधिपाः इत्यधिपाः। भवेत्वम्। त्वन्नः। न ऽइषम्। इषमूर्जम्। ऊ
र्जं यजमानाय। यजमानाय धेहि। धेहीति धेहि ५० अग्ने त्वम्। त्वम्पुरी
ष्यः। पुरीष्यो रयिमान्। रयिमान्पुष्टिमान्। रयिमानिति रयिमान्।
पुष्टिमान् २॥ असि। पुष्टिमानिति पुष्टिमान्। असीत्यसि ५१ मानेव
पुत्रम्। मातेवेतिमाता। इव। पुत्रम्। पृथिवी। पृथिवीं पुरीष्यम्।

सं

उरिष्यमाणिम्न। अग्निस्के। स्तपोमे। योनावमाः। अमाकृषा। ३ विश्वस्वा।
नाम्विश्पूर्वः। विश्वेदेवैः। देवेभिरन्त्रभिः। ऋतुभिः सावित्रानः ऋतुभि
रित्यृतु। भिः। सावित्रानः। प्रजापतिः। सावित्रानः इति। इतिसम्। वि
दानः। प्रजापतिर्विश्वकर्म्मा। प्रजापतिरितिप्र। जा। पतिः। विश्व
कर्म्मा। वि। विश्वकर्मेतिविश्व। कर्म्मा। विमुञ्चनमस्वन्तितिमुञ्च
५२ अमन्त्वन्तमयजमानमू। अयजमानमिच्छ। इच्छेत्नस्य। स्त
नस्येत्यामू। इत्यामन्त्। अविविहि। यद्दितस्करस्य। तस्करस्येति तस्क
रस्य। अन्यमस्मन्। अस्मदिच्छ। इच्छसा। मते। नरन्त्या। इत्यानमः।
नमोपिवि। देविनिर्ऋते। निर्ऋतेनभ्यम। निर्ऋतः इति निर्ऋतिः।
ऋते। तभ्यमस्तु। अपितस्तु ५३ नमः [illegible]। रुते। तनिर्ऋते।

114

निर्ऋतेतिग्मतेजः। निर्ऋतऽइति निःऽऋत। ऋते। तिग्मतेजो यस्म

यान्। तिग्मतेजऽइति तिग्मतेजः। अयस्मयान्वि विहृतन्तव हृतावब

न्धम्। बन्धमेतम्। एतमित्येनम्। यमेन त्वम्। त्वं यम्या। यम्या सं

विदाना। सम्विदानोत्तमे। सम्विदानेति सम्। विदाना। उत्तमे नाके।

उत्तमऽइत्युत्ऽतमे। नाकेऽअधि। अधि रोहय। रोहयैनम्। एनमि

त्येनम्। ४४ यस्यास्ते। ते घोरे। घोरेऽआसन्। आसञ्जुहोमि। जुहो

म्येषाम्। एषाम्बद्धानाम्। बद्धानामवसर्जनाय। अवसर्जना

येत्यवसर्जनाय। यान्त्वा। त्वा जनाः। जना भूमिः। भूमिरिति। इति

प्रमन्दते। प्रमन्दते निर्ऋतिम्। प्रमन्दतऽइति प्र। मन्दते। नि

र्ऋतिन्त्वा। निर्ऋतिमिति निः। ऋतिम्। त्वाहम्। अहम्परि। प

सं

115

त्रिवेद। वेदविश्वतः। विश्वतऽइतिविश्वतः ॥६४॥ यत्ते। देवी। देवीतिनिर्ऋ
तिः। निर्ऋतिः। आबबन्ध। निर्ऋतिरितिनिः। ऋतिः। आबबन्धपाश
म्। आबबन्धत्या। बबन्ध। पाशङ्ग्रीवासु। ग्रीवास्वविचृत्यम्। अ
विचृत्यमित्यविचृत्यम्। तत्ते। ते। वि। विष्यामि। स्याम्यायुषः। आ
युषान। नमध्यात्। मध्यादथ। अथैतम। एतंपितुम। पितुमद्धि।
अधिप्रसूतः। प्रसूतऽतिप्र। सूतः। नमोभूत्यै। भूत्यैयायदम्।
इदञ्चकार। चकारेतिचकार ॥६५॥ निवेशनः सङ्गमनः निवेश
नऽइतिनि। वेशनः। सङ्गमनोवसूनाम्। सङ्गमनऽइतिसम्।
गमनः। वसूनाम्विश्वा। विश्वरूपा। रूपाणि। अभिचष्टे। च
ष्टे शचीभिः। शचिभिरितिशचीभिः। देवऽइव। सविता। देवऽ

इवेतिदेवः। इव। सविता सत्यधर्मा। सत्यधर्मेन्द्रः। सत्यधर्मेति
सत्यधर्मा। इन्द्रो न। न तस्थे। तस्थौ समरे। समरे पर्षीनाम्। स
मर इति सम्। अरे। पर्षीणामिति पर्षीनाम्। ५७ सीरा युञ्जन्ति
युञ्जन्ति कवयः। कवयो युगा। युगा वि। वितन्वते। तन्वते पृथक्। पृ
थगिति पृथक्। धीरा देवेषु देवेषु सुम्नया। सुम्नयेति। सुम्न
या ५८ युनक्त सीरा। सीरा वि। वि युगा। युगा तनुध्वम्। तनुध्वं कृ
ते। कृते योनौ। योनौ वपतेह। इह बीजम्। बीजमिति बीजम्।
गिरा च। च श्रुष्टिः। श्रुष्टिः सभरः। सभरा असन्। सभरा इति सभ
राः। असन्नः। नो नेदीयः। नेदीय इत्। इत्सृण्यः। सृण्यः ऽप
क्वम्। पक्वमेयात्। एयादित्याऽयात्। ५९ शुनं वाहाः। सुफ

सं

लाः । फाला वि । वि हृषन्तु । कृषन्तु स्तिभिम् । भूमिं ऽ पुतनम् । शुनं हीना
शाः । कीनाशाः अभि । अभि यन्तु । यन्तु वाहैः । वाहैरिवाहैः । शुनासी
रा हविषा । हविषा तोशमाना । तोशमाना सुपिप्पलाः । सुपिप्पलाऽ
ओषधीः । सुपिप्पला ऽ इति सु । पिप्पलाः । ओषधीः कर्तन । कर्त्त
नास्मै । अस्मै ऽ इत्यस्मै ९ घृतेन सीता । सीता मधुना । मधुना सम्
म् । समज्यताम् । अज्यतां विश्वैः । विश्वैर्देवैः । देवैरनुमता । अनु
मता मरुद्भिः । अनुमतेत्यनु मता । मरुद्भिरिति मरुत् । भिः । ऊर्ज
स्वती पयसा । पयसा पिन्वमाना । पिन्वमानास्मान् । अस्मान्त्सी
ते । सीते पयसा । पयसाभि । अभ्याववृत्स्व । आ ववृत्स्व ववृत्स्वेति
ववृत्स्व । ९ । लाङ्गलं पवीरवत् । पवीरवन्त्सुशेवम् । सुशेवं ठस

116

मपित्तह। सुशेवमितिसुशेवम्। मामपित्तर्ह्विनिमपित्तह। न

ऽन्ता। उह्यपति। वपतिगाम्। गामविम्। अविम्फर्व्यम्। प्रफर्व्य

म्। प्रफर्व्यमितिप्रफर्व्यम्। चपीवरीम्। पीवरीम्प्रस्थावत्। प्र

स्थावद्रथवाहनम्। प्रस्थावदितिप्रस्थावत्। रथवाहनमिति

रथवाहनम्। ४२ कामङ्कामदुघे। कामदुघेधुक्ष्व। कामदुघः

इतिकामऽदुघे। धुक्ष्वमित्राय। मित्रायवरुणाय। वरुणायच।

चेतिच। इन्द्रायाश्विभ्याम्। अश्विभ्याम्पूष्णे। अश्विभ्यामित्यश्वि।

भ्याम्। पूष्णेप्रजाभ्यः। प्रजाभ्यऽओषधीभ्यः। प्रजाभ्यऽइतिप्र।

जाभ्यः। ओषधीभ्यऽइत्योषधीभ्यः। ४३ विमुच्यध्वम्। अवध

मघ्न्याः। अघ्न्यादेवयानाः। देवयानाऽअगन्म। देवयानाऽइति

सं

देव।यानाः।अगन्मतमसः।तमसस्पारम्।पारमस्य।अस्येत्यस्य।ज्यो
तिरापाम।आपामेत्यापाम। ७४ सञ्जर्भृः।सञ्जर्भृरितिसां।जर्भृः।अह्वे
अपवोभिः।अपवोभिरुषाः।अपवोभिरित्यपवः।भिः।उवाः।अ
रुणीभिः।अरुणीभिरित्यरुणीभिः।असजोषसावश्विना।सजो
षसाविति स।जोषसौ।अश्विनादꣳसोभिः।दꣳसोभिः स्तरः।दꣳसो
भिरितिदꣳसः।भिः।स्तरः।उपतयोन।उपतयोनवैश्वानरः।वैश्वान
रः।इउपा।इउपाघृतेन।घृतेनस्वाहा।स्वाहेतिस्वाहा। ७५ याओ
षधीः।ओषधीः पूर्वाः।पूर्वाजाताः।जातादेवेभ्यः।देवेभ्यस्त्रि
युगम्।त्रियुगंपुरा।त्रियुगमितित्रि।युगम्।पुरेतिपुरा।मनैनु
नुबभ्रूणाम्।बभ्रूणामहम्।अहꣳशतम्।शतंधामानि।

117

धामानि सप्त। सप्त च। चेति च। ७५ शतम्वः। वो ऽअम्ब। अम्ब धा
मानि। धामानि सहस्रम्। सहस्रमुत। उत वः। वो रुहः। रुहः इति
रुहः। अधा शतक्रत्वः। शतक्रत्वो यूयम्। शतक्रत्व ऽइति शत
क्रत्वः। यूयमिमम्। इमम्मे। मे ऽअगदम्। अगदङ्कृत। कृतेति कृत
७६ ओषधीः प्रति। प्रति मोदध्वम्। मोदध्वम्पुष्पवतीः। पुष्पवतीः
प्रसूवरीः। पुष्पवतीरिति पुष्पऽवतीः। प्रसूवरीरिति प्रऽसूवरीः
अश्वाऽइव सजित्वरीः। अश्वाऽइवेत्यश्वाःऽइव। सजित्वरीर्वीरुधः।
सजित्वरीरिति स। जित्वरीः। वीरुधः पारयिष्णवः। पारयिष्णवऽइति
पारयिष्णवः ७७ ओषधीरिति। इति मातरः। मातरस्तत्। तद्वः।
वो देवीः। देवीरुप। उप ब्रुवे। सनेयमश्वम्। अश्वङ्गाम्। गाम्वा

से

सः। वासः। आत्मानम्। आत्मानन्तव। तव पूरुष। पूरुष इति पुरु
ष १४ अश्वत्थे वः। वो निषदनम्। निषदनम्पर्णे। निसदनमिति
नि सदनम्। पर्णे वः। वो वसतिः। वसतिष्कृता। कृतेति कृता। गो
भाज इत्। गोभज इति गो भाजः। इत्किल। किला सथ। असथ
यत्। यत्सनवथ। सनवथ पूरुषम्। पूरुषमिति पुरुषम् ८॥ य
त्रौषधीः। ओषधीः समग्मत। समग्मत राजानः। समग्मतेति
सम्। अग्मत। राजानः समिताविव। समिताविवेति समितौ।
इव। विप्रः। सः। स उच्यते। उच्यते भिषक्। भिषग्रक्षोहा। रक्षो
हामीवचातनः। रक्षोहेति रक्षःऽहा। अमीवचातन इत्यमीव
चातनः ९॥ अश्वावतीं सोमावतीम्। अश्वावतीमित्यश्ववती

118

म्। सोमावतीम्। ऊर्जयन्तीम्। सोमवतीमिति सोम। वतीम्। ऊर्जयन्तीम्। उदोजसम्। उदोजसमित्युत्। ओजसम्। आवित्सि। अवित्सि सर्वाः। सर्वाः। ओषधीः। ओषधीरस्मै। अस्मा। अरिष्टतातये। अरिष्टतातये। अरिष्टतातय इत्यरिष्ट। तातये ॥ १२ ॥ उच्छुष्माः। शुष्माः। ओषधीनाम्। ओषधीनाम्। गावः। गावो गोष्ठादिव। गोष्ठादिवेरते। गोष्ठादिवेति गो। स्थात्। इव। इरतः। इरतेरते। धनम्। सनिष्यन्तीनाम्। सनिष्यन्तीनामात्मानम्। आत्मानं तव। तव पूरुष। पूरुषेति पूरुष ॥ १२ ॥ उत्कन्तीमा। नामवः। वो माता। माता। मातायः। अपो रस्यो। पय। स्था। स्थानिष्कृतीः। निः। कृतीरिति निः। कृतीः। सीराः। पतत्रिणीः। पतत्रिणी स्थनास्थन यतनाय

सं०

दामयति। आमयति निः। निष्कृथ। कृथेति कृथ १४ अति विश्वाः। वि
श्वः परिष्ठाः। परिष्ठाः स्तेनःऽइव। परिस्थाऽइति परिस्थाः। स्तेनःऽइव
व्रजम्। स्तेन इवेति स्तेनःऽइव। व्रजमक्रमुः। अक्रमुरित्यक्रमुः।
ओषधीः प्रा। प्राचुच्यवुः। अचुच्यवुर्यत्। यत्किम्। किंच। च तन
न्वः। तन्वो रपः। रपऽइति रपः १५ यदिमाः। इमा वाजयन्। वाज
यन्नहम्। अहमोषधीः। ओषधीर्हस्ते। हस्तेऽआदधे। आदधऽइ
त्यादधे। आत्मा यक्ष्मस्य। यक्ष्मस्य नश्यति। नश्यति पुरा। पुरा जी
वगृभः। जीवगृभो यथा। जीवगृभऽइति जीवाऽगृभः। यथे
ति यथा १६ यस्यौषधीः। ओषधीः प्रसर्पथ। प्रसर्पथाङ्गमङ्ग
म्। प्रसर्पथेति प्रसर्पथ। अङ्गमङ्गम्परुष्परुः। अङ्गमङ्ग।

119

मित्रऽऋतम् । ऋतऽऋतम् । पहः पहेति पहः । पहः । ननोयत्स्मान् ।
यत्स्मात्ति । विबाधन्ते । बाधइऽइत्र्यः । इत्र्यऽमध्यमशीरिव । मध्य
मशीरिवेति मध्यमशीः ॥ २७ ॥ साकं यत्स्म । यत्स्म प्र । प्रप
न । पतच्चाषेण । चाषेण किकिदीविना । किकिदीविनेति किकि
दीविना । साकन्वातस्य । वातस्य ध्राज्या । ध्राज्या साकम् । साक
न्नश्य । नश्य निहाकया । निहाकयेति निहाकया ॥ २८ ॥ अश्म
वः । वोऽश्म्नाम् । अश्म्नाम वन्ता । अव स्वन्या । अश्मोन्यस्याः ।
अश्मस्याऽउप । उपावन्ता । अवतेत्यवन्ता । नाः सर्वाः । सर्वाः सांश्वि
दानाः । सांश्विदानाऽइति सं दमा । सांश्विदाना इति सम् । विदा
नाः । इदं मे । मेघ्रा । प्रावत । अवताव च । वचऽइति वचः ॥ २९ ॥

सं

याः फलिनीः। फलिनीरफलाः। अफला अपुष्पाः। अपुष्पा याः। या
श्च पुष्पिणीः। पुष्पिणीरिति पुष्पिणीः। बृहस्पतिप्रसूतास्ताः
बृहस्पतिप्रसूता इति बृहस्पतिऽप्रसूताः। ता नः। नो मुञ्चन्तु। मु
ञ्चन्त्वंहसः। अंहस इत्यंहसः ८ मुञ्चन्तु मा। मा शपथ्यात्।
शपथ्यादथो। अथो वरुण्यात्। अथोऽ इत्यथो। वरुण्यादुत। उते
त्युत। अथो यमस्य। अथोऽ इत्यथो। यमस्य पड्बीशात्। पड्बीशा
त्सर्वस्मात्। सर्वस्माद्देवकिल्बिषात्। देवकिल्बिषादिति दे
वकिल्बिषात् ९ अवपतन्तीरवदन्। अवपतन्तीरित्यव
पतन्तीः। अवदन्दिवः। दिवऽ ओषधयः। ओषधयस्परि। परीति
परि। यं जीवम्। जीवमश्नवामहै। अश्नवामहै न। न सः। स

120

12

त्रिष्ठाति। त्रिष्ठा। तिष्ठ कषः। ष्ठ कषः इति ष्ठकष ८२ या॰ ओषधीः। ओषधीः। सोमराज्ञीः। सोमराज्ञीर्वह्वीः। सोमराज्ञीरिति सोम। राज्ञीः। बह्वीः शतविचक्षणाः। शतविचक्षणा इति शत। विचक्षणाः। तासामसि। त्वमुत्तमा। उत्तमा। उत्तमेत्युत्। तमा। अरम्। कामाय। शम्। हृदे। हृद इति हृदे ८३ विष्ठिताः पृथिवीमनु। विस्थिता इति वि। स्थिताः। पृथिवीमनु। आदित्याः। बृहस्पतिप्रसूताः। बृहस्पतिप्रसूता इति। प्रसूताः। अस्यै। सन्दत्त। वीर्य्यम्। वीर्य्यमिति वीर्य्यम् ८४ या॰ चेदम्। इदमुपशृण्वन्ति। उपशृण्वन्तीत्युपशृण्वन्ति। या॰ चदूरं

सं

मः । इरस्यपरागताः । परागताः ऽइतिपरा । गताः । सर्वाः सङ्गत्य । सङ्ग
वीरुधः । सङ्गत्येतिसम् । गत्य । वीरुधः ऽइतिवीरुधः ८५ मा । वः ।
वोरिषत् । रिषत्खनिता । खनितायस्मै । यस्मैच । चाहम् । अहङ्ख
नामि । खनामिवः । वः ऽइतिवः । द्विपाच्चतुष्पात् । द्विपादितिद्वि ।
पात् । चतुष्पादस्माकम् । चतुःपादितिचतुः । पात् । अस्मा
कं सर्वम् । सर्वमस्तु । अस्त्वनातुरम् । अनातुरमित्यनातुरम्
८६ ओषधयः सम् । समवदन्त । अवदन्त सोमेन । सोमेन सः
ह । सहराज्ञा । राज्ञेतिराज्ञा । यस्मैकृणोति । कृणोतिब्राह्मणः ।
ब्राह्मणस्तम् । तं राजन् । राजन्पारयामसि । पारयामसीति
पारयामसि ॥ ८७ नाशयित्रीबलासस्य । बलासस्याशसः । अ

121

१२२

धीमः। उपचिताम। उपचितामसि। उपचितामित्युपचिताम्। अभीत्य
सि। अभ्येषां पातस्य। अभ्येषां अस्य येषां। पातस्य यत्स्माणाम्। यत्स्माणा
स्माकारोः पाकारो रसि। पाकारो विति पाका अरोः। अस्मिनाधानी।
नाधानीति नाधानी ८८ त्वाद्यर्थाः। यामवीः आविनत्। अविनति
त्रूः। इन्द्रो बृहस्पतिः। बृहस्पतिरिति बृहस्पतिः। ओषधे सोमः।
सोमो राजा। राजा विद्वान्। विद्वाय्यस्मात्। यस्मादवचयन। अव
चयतेत्यवच्यत ८९ सहस्व मे। मे अरातीः। अरातीः सहस्व। सहस्व
पृतनायतः। पृतनायतऽइति पृतनायतः। सहस्व सर्वम्। सर्वम्पा
प्मानम्। पाप्मानऽसहमाना। सहमानासि। असोषधे ओषधयः २
न्योषधे ९० दीर्घायुत्त्वा। दीर्घायुरिति दीर्घाऽआयुः। तऽओषधे। ओष

सं

येत्वेतित्न। त्वेनि ताय स्मै। यस्मै च। चतत्। नात्वनामि। त्वनास्यह
म्। अहमित्यहम्। श्रुण्वोत्तम। श्रुण्वोऽ इत्यण्वो। त्वन्दीर्घायुः। दीर्घायु
र्भुत्वा। दीर्घायुरिति दीर्घ। आयुः। भूत्वा शतवल्शा। शतवल्शा वि।
शतवल्शेति शत। वल्शा। विरोहतात्। रोहतादिति रोहतात्। ९।
त्वमुत्तमा। उत्तमासि। उत्तमेत्युत्। तमा। यस्त्रायोषधे। ओषधे मव।
नवह्वताः। ह्वता उपस्तयः। उपस्तयः उपस्तय इत्युपास्तयः। उपास्तिरस्तु।
अस्मत्क। सोऽस्माकम्। अस्माकंयः। योऽअस्मान्। अस्मान् २॥३॥ अ
भिदासति। अभिदासतीत्यभि। दासति। १२ मामा। मारिष्ठ। सी
त्वा। रिष्ठ सीत्वा। जनिता यः। पृथिव्याः। पृथिव्या यः। योवा। वा
दिवम्। दिवं सत्यधर्मा। सत्यधर्मा वि। सत्यधर्मेति सत्य।

धर्म्मा। व्यानट्। व्यानडिति व्यानट्। यश्च। चापः। अपश्चन्द्राः॥ चन्द्राः प्र
थमः। प्रथमो जजान। जजान कस्मै। कस्मै देवाय। देवाय हवि
षा। हविषा विधेम। विधेमेति विधेम॥ ६३ अभ्यावर्त्तस्व। आवर्त्त
स्व। वर्त्तस्व पृथिवि। पृथिवि यज्ञेन। यज्ञेन पयसा। पयसा सह। स
हेति सह। वपान्ते। ते अग्निः। अग्निरिषितः। इषितोऽरोहत्। अ
रोहदित्यरोहत्॥ ६४ अग्ने यत्। यत्ते शुक्रम्। शुक्रं यच्चन्द्रम्। चन्द्र
म्पूतम्। पूतं यच्च। च यज्ञियम्। यज्ञियमिति यज्ञियम्। तद्देवेभ्यः।
देवेभ्यो भरामसि। भरामसीति भरामसि॥ ६५ इषमूर्जम्। ऊर्ज
महम्। अहमितः। इत आदम्। आदमृतस्य। ऋतस्य योनिम्।
योनिम्महिषस्य। महिषस्य धाराम्। धारामिति धाराम्। आमा

मागोषु।गोषु विश्वात। विश्वात्रात न नृषु। आ तक्तेषु। तन्त्ज्ञ जहाति। जहा
मि मे दिवा। मे दिवमतिरामा। अतिराममिवाम। अमीवामित्यमीवाम् ९९
अग्ने तव। तव श्रवः। श्रवो वयः। वयो महि। महि भ्राजन्ते। भ्राजन्तेऽ
अर्चयः। अर्चयो विभावसो। विभावसोऽ इति विभा। वसो। बृहद्भानो
शवसा। बृहद्भानोऽ इति बृहत्। भानो। शवसा वाजम्। वाजमुक्
थ्यम्। उक्थ्यं दधासि। दधासि दाशुषे। दाशुषे कवे। कवऽ इति कवे
९७ पावकवर्चाः शुक्रवर्चाः। पावकवर्चाऽ इति पावक॥व
र्चाः। शुक्रवर्चाऽ अनूनवर्चाः। शुक्रवर्चाऽ इति शुक्रवर्चाः। अ
नूनवर्चाऽ उत्। अनूनवर्चाऽ इत्यनूनऽवर्चाः। उदियर्षि। इयर्षि
भानुना। भानुनेति भानुना। पुत्रो मातरा। मातरा विचरन्। वि

चरन्नपा। विचरन्निति वि। चरन्। उपावसि। अवसि धृष्णो। धृष्णो रि
रोदसी। रोदसी ऽउभे। आ रोदसी ऽइति रोदसी। उभे इत्युभे ॥ ४८ ॥ ऊर्जो
नपात्। नपाज्जातवेदः। जातवेदः सुशस्तिभिः। जातवेद ऽइति
जातवेदः। सुशस्तिभिर्मन्दस्व। सुशस्तिभिरिति सुशस्तिऽभिः। मन्
दस्व धीतिभिः। धीतिभिर्हितः। धीतिभिरिति धीतिऽभिः। हित
ऽइति हितः। त्वेऽइषः। त्वेऽइति त्वे। इषः सम्। सं दधुः। दधुर्भूरि
वर्पसः। भूरिवर्पसश्चित्रोतयः। भूरिवर्पस ऽइति भूरिऽवर्पसः।
चित्रोतयो वामजाताः। चित्रोतय ऽइति चित्रऽऊतयः। वामजाता
इति वाम। जाताः ॥ ४९ ॥ इरज्यन्नग्ने। अग्ने प्रथयस्व। प्रथयस्व जन्
तुभिः। जन्तुभिरस्मे। जन्तुभिरिति जन्तुऽभिः। अस्मे रायः।

से

अस्मेऽइत्यस्मे । रायेऽअमर्त्य । अमर्त्यन्त्यमर्त्य । स्वर्दर्शतस्य । दर्शतस्य स्व
भ्रष्टः । वसुषोवि । विराजसि । राजसीष्टगातादि । ष्टगातादिसानसिम् । सा
नसिं कृतम् । कृतमितिकृतम् । १० इन्द्रा रमद्वरस्य । अद्वरस्य
प्रचेतसम् । प्रचेतसस्त्वयन्तम् । प्रचेतसमितिप्र । चेतसम् । त्वयन्तं॰
राधसः । राधसोमहः । महऽइतिमहः । रातिम्वामस्य । वामस्य सुभ
गाम् । सुभगाम्महाम् । सुभगामितिसुभगाम् । महीमिषम् । इषन्द
धासि । दधासिसानसिम् । सानसिं॰ रयिम् । रयिमितिरयिम् । ११
ऋतावानम्महिषम् । ऋतवानमित्यृतवानम् । महिषान्विश्वद
र्शतम् । विश्वदर्शतमिमग्निम् । विश्वदर्शतमितिविश्व । दर्श
तम् । अग्निं॰ सुम्नाय । सुम्नायदधिरे । दधिरेपुरःप्रजानाः ।

124

जनाऽइतिजनाः। ऋक्कर्णिऽसप्रथस्तमम्। ऋक्कर्णिमितिऋक्त।
कर्णिम्। सप्रथस्तमन्त्वा। सप्रथस्तममितिसप्रथःतमम्। त्वगि
रा। गिरादैव्यम्। दैव्यम्मानुषा। मानुषायुगा। युगेतियुगा ॥१२॥ आ
प्यायस्व। प्यायस्वसमम्। समेतु। एतुते। तेविश्वतः। विश्वतःसोम। सोम
वृष्ण्यम्। वृष्ण्यमितिवृष्ण्यम्। भवावाजस्य। वाजस्यसङ्गथे। सङ्गथऽ
इतिसम्गथे ॥१३॥ सन्ते। तेपयांसि। पयांसिसम्। समुयन्तु।
ऊँऽइत्यूँ। यन्तुवाजाः। वाजावृष्ण्यानि। वृष्ण्यान्यभिमातिषाहः। अभि
मातिषाहऽइत्यभिमाति। सहः। आप्यायमानोऽअमृताय। आप्या
यमानऽइत्या। प्यायमानः। अमृतायसोम। सोमदिवि। दिविश्रवा
ंसि। श्रवांस्युत्तमानि। उत्तमानिधिष्व। उत्तमानीत्युत्तमा

मे

नि। पिबेतिपिब १-४ आप्यायस्व। प्यायस्व मदिन्तम। मदिन्तमसोम। मदि-
न्तमेतिमदिन्ऽतम। सोम। सोमविश्वेभिः। विश्वेभिरंऽशुभिः। अंऽशुभिरि-
त्यंऽशुभिः। भवानः। नः सप्रथस्तमः। सप्रथस्तमस्सखा। सखा। सप्रथस्त-
मऽइतिसप्रथः। तमः। सखावृधे। वृधऽइतिवृधे १-५ आ। ते। नेवन्तः।
वत्सोमनः। मनोयमत्। यमत्परमात्। परमाच्चित्। चित्सधस्थात्।
सधस्थादितिसधऽस्थात्। अग्नेत्वाङ्कामयागिरा। त्वाङ्कामायेतित्वा-
म्। कामया। गिरेतिगिरा १-६ तुभ्यन्ताः। ताः अङ्गिरस्तम। अङ्गि-
रस्तमविश्वाः। अङ्गिरस्तमेत्यङ्गिरः। तम। विश्वाः सुक्षितयः। सुक्षि-
तयः पृथक्। सुक्षितयऽइतिसु। क्षितयः। पृथगितिपृथक्। अग्ने
कामाय। कामाययेमिरे। येमिरऽइतियेमिरे १-७ अग्निः। प्रिये

125

षु। प्रियेषुधामसु। धामसुकामः। धामस्विति धामऽसु। कामोऽस्

तस्य। भूतस्यभव्यस्य। भव्यस्येतिभव्यस्य। सम्राडेकः। सम्राडितिसम्

म्ऽराट्। एको वि। विराजति। राजतीतिराजति। १८ इति क्रमदी

पिकायामेकोध्यायः। १२ मयिगृह्णामि। गृह्णाम्यग्रे। अग्रेऽग्निम्। अ

ग्निंरायः। रायस्पोषाय। पोषायसुप्रजास्त्वाय। सुप्रजास्त्वायसु

वीर्याय। सुप्रजास्त्वायेतिसुप्रजाःऽत्वाय। सुवीर्यायेतिसु। वीर्या

य। मामुदेवताः। ऽउ इत्यूँ। देवताः सचन्ताम्। सचन्तामितिसचन्ता

म्। १ ब्रह्मजज्ञानम्। जज्ञानम्प्रथमम्। प्रथमम्पुरस्तात्। पुरस्ताद्वि

सीमतः। सीमतःसुरुचः। सुरुचोवेनः। सुरुचऽइतिसु। रुचः। वे

नः। वेनऽआवः। आवरित्याऽवः। सबुध्न्याः। बुध्न्याऽउपमाः। उपमा

मं

ऽअस्य । उपमाः ऽ इत्युप ऽ माः । अस्य विष्ठाः । विष्ठाः सतः । विष्ठा ऽ इति वि
स्थाः । सतश्च । च योनिम् । योनिमसतः । असतश्च । च विवः । विवः । वि
ति विवः ॥ २ ॥ हिरण्यगर्भः सम् । हिरण्यगर्भ ऽ इति हिरण्य ऽ गर्भः ।
समवर्त्तत । अवर्त्तताग्रे । अग्रे भूतस्य । भूतस्य जातः । जातः पतिः ।
पतिरेकः । एकः ऽ आसीत् । आसीदित्यासीत् । स दाधार । दाधार पृ
थिवीम् । पृथिवीं द्याम् । द्यामुत । उतेमाम् । इमामितीमाम् । द्रप
श्चस्कन्द । चस्कन्द पृथिवीम् । पृथिवीमनु । अनु द्याम् । द्यामिमम् ।
इमञ्च । च योनिम् । योनिमनु । अनु यः । यश्च । च पूर्वः । पूर्व ऽ इति पू
र्वः । समानं योनिम् । योनिमनु । अनु सञ्चरन्तम् । सञ्चरन्तन्द्र
प्सम् । सञ्चरन्तमिति सम् ऽ चरन्तम् । द्रप्सञ्जुहोमि । जुहोम्यनु ।

126

अनु सप्ता सप्त होत्राः । होत्रा ऽइति होत्राः ५ नमोऽस्तु । अस्तु सर्पेभ्यः ।
सर्पेभ्यो ये । ये के । के च । च पृथिवीम् । पृथिवीमनु । अन्वनु । ये ऽअ
न्तरिक्षे । अन्तरिक्षे ये । ये दिवि । दिवि तेभ्यः । तेभ्यः सर्पेभ्यो नमः ।
नम ऽइति नमः ५ या ऽइषवः । इषवो यातुधानानाम् । यातुधानाना
म् ये । यातुधानानामिति यातु । धानानाम् । ये वा । वा वनस्पतीन् । वनस्प
तीं२ रनु । अन्वित्यनु । ये वावटेषु । अवटेषु शेरते । शेरत ऽइति शे
रते ६ ये वा । वामी । अमी रोचने । अमी ऽइत्यमी । रोचने दिवः । दिवो
ये । ये वा । वा सूर्यस्य । सूर्यस्य रश्मिषु । रश्मिष्विति रश्मिषु । ये
षामप्सु । अप्सु सदः । अप्स्वित्यप्सु । सः । सदस्कृतम् । कृतमिति कृ
तम् । ७ कृणुष्व पाजः । पाजः प्रसितिम् । प्रसितिं न । प्रसितिमिति

सं

तिग्म । सितिम । न पृथ्वीम । पृथ्वीं याहि । याहि राजेव । राजेवामवान् । रा
जेवेति राजाऽइव । अमवा इभेन । अमवानित्यमवान् । इभेनेतीभेन ।
तृष्वीमनु । अनु प्रसितिम् । प्रसितिं द्रूणानः । प्रसितिमिति प्र । सितिम् ।
द्रूणानोऽस्ता । अस्तासि । असि विध्य रक्षसः । रक्षसस्तपिष्ठैः । तपिष्ठैरि
ति तपिष्ठैः ८ तव भ्रमासः । भ्रमास आशुया । आशुया पतन्ति । अ
शुयेत्याशुया । पतन्त्यनु । अनु स्पृश । स्पृश धृषता । धृषता शोशु
चानः । शोशुचानः इति शोशुचानः । तपूंष्यग्ने । अग्ने जुह्वा । जु
ह्वा पतङ्गान् । पतङ्गानसंदितः । असंदितो वि । असंदित इत्यसम्
ऽदितः । वि सृज । सृज विष्वक् । विष्वगुल्काः । उल्का इत्युल्काः ।
९ प्रति स्पशः । स्पशो वि । वि सृज । सृज तूर्णितमः । तूर्णितमो

127

भवा। तरुत्रीति नमः इति तरुत्री। नमः। भवा पायुः। भवा पायुर्विशः।
विशो ऽस्याः। अस्या अदब्धः। अदब्धो दूरे। अदब्धा इत्यदब्धः। यो नः। नो
दूरे। दूरे ऽघशंसः। अघशंसो यः। अघशंस इत्यघऽश
ंसः। यो ऽन्ति। अन्त्यग्ने। अग्ने माकिः। माकिष्टे। ते व्यथिः। व्य
थिरा दधर्षीत्। आ दधर्षीत्। दधर्षीदिति दधर्षीत्॥ ९॥ उदग्ने।
अग्ने तिष्ठ। तिष्ठ प्रति। प्रत्यातनुष्व। आ तनुष्व। तनुष्व नि। न्यमि
त्राम्। अमित्राँ ओषतात्। ओषतात्तिग्महेते। तिग्महेते। तिग्महे
त इति तिग्मऽहेते। यो नः। नो ऽरातिम्। अरातिं समिधा
न। समिधान चक्रे। समिधानेति समऽइधान। चक्रे नीचा।
नीचा तम्। तं धक्षि। धक्ष्यतसम्। अतसं न। न शुष्कम्। शुष्क

सं

मितिश्रुष्कम्। ॥ ॐ ह्रौं भवः सवप्रति। प्रतिविद्वा। विद्वापि। अग्न्यस्म
न। अस्मयक्षि। आविष्कृणुष्व। कृणुष्वदैव्यानि। दैव्यान्यग्ने। अग्नेऽ
इत्यग्ने। अर्वास्थिरा। स्थिरातनुहि। तनुहियातु। जूनाम्। यातुजूना
जामिम्। यातुजूनामितियातु। जूनाम्। जामिमजामिम्। अजा
मिप्र। प्रमृणीही। मृणीहिशत्रून्। शत्रूनितिनिशत्रून्। अग्नेष्ट्वा।
त्वातेजसा। तेजसादयामि। सादयामीतिसादयामि १२ अवोज
नस्य। यतस्यजसा रजसश्च। चनेना। नेनायत्र। यत्रानिष्ठुद्भिः।
निष्ठुद्भिः सचसे। निष्ठुद्भिरितिनिष्ठुत्। भिः। सचसशिवाभिः।
शिवाभिरितिशिवाभिः। दिविमूर्द्धानम्। मूर्द्धानन्दधिषे। दधि
षेस्वर्षाम्। स्वर्षाञ्जिह्वाम्। स्वः सामितिस्वः। साम्। जिह्वाम

128

ग्ने। अग्ने चकृषे। चकृषे हव्यवाहम्। हव्यवाहमिति हव्यऽवाहम्॥१५॥
ध्रुवासि। असि धरुणा। धरुणास्तृता। आस्तृता विश्वकर्मणा। आस्तृ
तेत्यास्तृता। विश्वकर्मणेति विश्व। कर्मणा। मा त्वा। त्वा समुद्रः। समु
द्रऽउत्। उद्वधीत्। वधीन्मा। मा सुपर्णः। सुपर्णोऽव्यथमाना। सुपर्ण
ऽइति सुपर्णः। अव्यथमाना पृथिवीम्। पृथिवीन्दृꣳह। दृꣳहे
ति दृꣳह॥१६॥ प्रजापतिष्ट्वा। प्रजापतिरिति प्रजापतिः। त्वा सादय
तु। सादयत्वपाम्। अपाम्पृष्ठे। पृष्ठे समुद्रस्य। समुद्रस्येमन्। एम
न्नित्येमन्। व्यचस्वतीम्प्रथस्वतीम्। प्रथस्वतीम्प्रथस्व। प्रथस्व
पृथिवी। पृथिव्यसि। असीत्यसि॥१७॥ भूर्भूमिः। भूमिरदितिः। अ
दितिः। अदितिर्विश्वधायाः। विश्वधाया विश्वस्य। विश्वधायाऽइ

सं

तिविश्वधायाः।विश्वस्यभुवनस्य।भुवनस्यधर्त्रीतिधर्त्री।पृथिवीय
च्छ।यच्छदृंह।दृंह।दृंहमा।माहिंसीः।हिंसीरितिहिंसीः १९ विश्व
स्मैप्राणाय।प्राणापानाय।अपानायव्यानाय।अपानायेत्यप।आनाय।
व्यानायोदानाय।व्यानायेतिवि।आनाय।उदानायप्रतिष्ठायै।उदाना
येत्युत्।आनाय।प्रतिष्ठायैचरित्राय।प्रतिष्ठायाऽइतिप्रति।स्थायै।
चरित्रायेतिचरित्राय।अग्निष्ट्वा।त्वाभि।अभिपातु।पातुमह्या।मह्या
स्वस्त्या।स्वस्त्याछर्दिषा।छर्दिषाशन्तमेन।शन्तमेनेतिशम।तन
मेन २० काण्डात्काण्डात्प्ररोहन्ती।काण्डात्काण्डादितिकाण्डा
त्।काण्डात्।प्ररोहन्तीपरुषः परुषः।प्ररोहन्तीतिप्ररोहन्ती।
परुषः परुषस्परि।परुषः परुषऽइतिपरुषः परुषः।परीतिप

129

रि। एवा नः। नो दूर्वे। दूर्वे प्र। प्र तनु। तनु सहस्रेण। सहस्रेण शतेन।
शतेन च। चेति च १८ या शतेन। शतेन प्रतनोषि। प्रतनोषि सहस्रे
ण। प्रतनोषीति प्र। तनोषि। सहस्रेण विरोहसि। विरोहसीति वि रो
हसि। तस्यास्ते। ते देवि। देवीष्टके। इष्टके विधेम। विधेम हविषा।
हविषा वयम्। वयमिति वयम्। १९ यास्ते। तेऽअग्ने। अग्ने सूर्ये।
सूर्ये रुचः। रुचो दिवम्। दिवमातन्वन्ति। आतन्वन्ति रश्मिभिः।
आतन्वन्तीत्या तन्वन्ति। रश्मिभिरिति रश्मि। भिः। ताभिर्न्नः। नोद्य
द्य। अद्य सर्वाभिः। सर्वाभिरुचे। रुचे जनाय। जनाय नः। नस्कृधि। कृ
धीति कृधि २० यो वः। वो देवाः। देवाः सूर्ये। सूर्ये रुचः। रुचो गो
षु। गोष्वश्वेषु। अश्वेषु याः। या रुचः। रुचऽइति रुचः। इन्द्राग्नी

सं

ताभिः। इन्द्राग्नी इतीन्द्राग्नी। ताभिः सध्रीचीभिः। सध्रीचीभी रुचम्। रुचं नः। नो धत्त। धत्त बृहस्पते। बृहस्पत इति बृहस्पते २१ विराड् ज्योतिः। विराडिति वि।राट्। ज्योतिरधारयत्। अधारयत्स्वराट्। स्वराड् ज्योतिः। स्वराडिति स्व।राट्। ज्योतिरधारयत्। अधारयदित्यधारयत्। पृष्ठे पृथिव्याः। पृथिव्या ज्योतिष्मतीम्। ज्योतिष्मतीमिति ज्योतिष्मतीम्। विश्वं ज्योतिः। ज्योतिर्यच्छ। यच्छेति यच्छ। अग्निष्टे। ते अधिपतिः। अधिपतिरित्यधिपतिः २२ मधुश्च। च माधवः। माधवश्च। च वासन्तिकौ। वासन्तिकावृतू। ऋतू अग्नेः। ऋतू इत्यृतू। अग्नेरन्तःश्लेषः। अन्तःश्लेषोऽसि। अन्तःश्लेष इत्यन्तःश्लेषः। असि कल्पेताम्। कल्पेताम्। कल्पेतान्द्यावापृथिवी। द्यावापृथि

130

वी कल्पन्ताम्। द्यावापृथिवी इति द्यावापृथिवी। कल्पन्ताम् आपः।
आपः ओषधयः। ओषधयः कल्पन्ताम्। कल्पन्ताम् अग्नयः। अग्नयः पृ
थक्। पृथक् मम। मम ज्यैष्ठ्याय। ज्यैष्ठ्याय सव्रताः। सव्रता इति स
व्रताः। ये अग्नयः। अग्नयः समनसः। समनसो अन्तरा। समनस इ
ति सऽमनसः। अन्तरा द्यावापृथिवी। द्यावापृथिवी इमे। द्यावापृ
थिवी इति द्यावापृथिवी। इमे इतीमे। वासन्तिकावृतू। ऋतू ऽ
अभिकल्पमानाः। ऋतू इत्यृतू। अभिकल्पमाना इन्द्रमिव।
अभिकल्पमाना इत्यभिऽकल्पमानाः। इन्द्रमिव देवाः। इन्द्रमिवेती
न्द्रम्। इव। देवा अभिसंविशन्तु। अभिसंविशन्तु ध्रुवे। अभिसं
विशन्त्वित्यभि। संविशन्तु एव सीदतम्। ध्रुवे इति ध्रुवे। सीदत

ष्मिति सीदतम् । अषाढाऽसि । असि सहमाना । सहमाना सहस्व । सहस्वारातीः । अरातीः सहस्व । सहस्व । पृतनायतः । पृतनायत इति पृतनायतः । सहस्रवीर्याऽसि । सहस्रवीर्येति सहस्र वीर्या । असि सा । सा मा । मा जिन्व । जिन्वेति जिन्व २६ मधु वाताः । वाता ऋतायते । ऋतायते मधु । ऋतयत इत्यृतऽयते । मधु क्षरन्ति । क्षरन्ति सिन्धवः । सिन्धव इति सिन्धवः । माध्वीर्नः । नः सन्तु । सन्त्वोषधीः । ओषधीरित्योषधीः २७ मधु नक्तम् । नक्तमुत । उतोषसः । उषसो मधुमत् । मधुमत्पार्थिवम् । मधुमदिति मधु । मत् । पार्थिवꣳ रजः । रज इति रजः । मधु द्यौः । द्यौरस्तु । अस्तु नः । नः पिता । पितेति पिता २८ मधुमान्नः । मधुमानिति मधु । मान् । नो वनस्पतिः ।

वनस्पतिर्मधुमान्। मधुमा २।३ अस्तु। मधुमानिति मधुमान्। अस्तु

सूर्यः। सूर्यः इति सूर्यः। माध्वीर्गावः। गावो भवन्तु। भवन्तु नः। नः

इति नः। २७ अपाम्। गम्भन्। गम्भन्त्सीद। सीद मा। मा त्वा। त्वा सूर्यः। सूर्यो

भि। अभिताप्सीत्। ताप्सीन्मा। माग्निः। अग्निर्वैश्वानरः। वैश्वानर इति

वैश्वानरः। अच्छिन्नपत्राः प्रजाः। अच्छिन्नपत्रा इत्यच्छिन्नपत्राः। प्र

जाः। अनुवीक्षस्व। प्रजा इति प्रजाः। अनुवीक्षस्वानु। अनुवीक्षस्व

स्वानु। वीक्षस्व। अनु त्वा। त्वा दिव्या। दिव्या वृष्टिः। वृष्टिः सचताम्। स

चतामिति सचताम्। २८ त्रीन्त्समुद्रान्। समुद्रान्त्सम्। समसृपत्। अ

सृपत्स्वर्गान्। स्वर्गानपः। स्वर्गानिति स्वः गान्। अपाम्पतिः। प

तिर्वृषभः। वृषभ इष्टकानाम्। इष्टकानामितीष्टकानाम्। पुरी

सं

घंव्वसानः। व्वसानः। सुकृतस्य। सुकृतस्यलोके। सुकृतस्येतिसु। कृत
स्य। लोकेतत्र। तत्रगच्छ। गच्छयत्र। यत्रपूर्वे। पूर्वेपरेताः। परेताऽइति
परा। इताः ४९ इतायुत्रे। जज्ञेप्रथमम्। प्रथममेभ्यः। एभ्योयोनि
भ्यः। योनिभ्यःअधि। योनिभ्यऽइतियोनिभ्यः। अधिजातवेदाः।
जातवेदाऽइतिजात। वेदाः। सगायत्र्या। गायत्र्यात्रिष्टुभा। त्रिष्टुभा
नुष्टुभा। त्रिस्तुभेतित्रि। स्तुभा। अनुष्टुभाच। अनुष्टुभेत्यनु। स्तुभा।
चदेवेभ्यः। देवेभ्योहव्यम्। हव्यम्वहतु। वहतुप्रजानन्। प्रजान
न्नितिप्र। जानन् ५० इषेराये। रायेरमस्व। रमस्वसहसे। सहसेद्यु
म्ने। द्युम्नऽऊर्जे। ऊर्जेअपत्याय। अपत्यायेत्यपत्याय। सम्रा
डसि। सम्राडितिसम्। राट्। असिस्वराट्। स्वराडसि। स्वराडिति

स

स्वपाटा। श्रुतिमारस्वतो। मारस्वतोता। तोत्सौ। उत्सौमा। मावतामृ। अ
वतामिन्द्रवताम् ३१ अग्नेशुक्राः। शुक्रादिवि। दिवि। ये नवा। नवास्थासः।
अश्वासः। अश्वासोदेवा। देवमाधवः। माधवः इति माधवः। अरवस्मा
बृहन्तिमग्नवे। मग्नवः इति मग्नवे २२ जुव्हाहि। हिदेवहूतमा३।
देवहूतमा २॥ अश्यान्। देवहूतमानिति देव। हूतमान्। अश्वा २॥
अग्ने। अग्नेरथीरिव। रथीरिवै वथीः। एवानिहोता। होतापूर्व्यः।
पूर्व्यसदः। सदः इति सदः। २३ सम्पश्यन्तवान्ति। एवान्तिसरितः।
सरितोना। नयेनाः। येनाः अन्तः। अन्तर्हृदा। हृदामनसा। म
नसापूयमानाः। पूयमानाः इति पूयमानाः। इतेसरतः। पा
गाः। घामि। आभिचाकशीमि। चाकशीमिहिरण्ययः। हिरण्ययो

सं

देवतमः। देवतमो मध्ये। मध्ये अग्नेः। अग्नेरित्यग्नेः २४ अवेत्वा। त्वा
हुवे। हुवे भासे। भासे ज्योतिषे। ज्योतिषऽइति ज्योतिषे। अमदिदम्।
इदं विश्वस्य। विश्वस्य भुवनस्य। भुवनस्य भुवनस्य वाजिनम्।
वाजिनमग्नेः। अग्नेर्वैश्वानरस्य। वैश्वानरस्याथ। चेति च २५ अग्नि
र्ज्योतिषा। ज्योतिषा ज्योतिष्मान्। ज्योतिष्मान् रुक्मः। रुक्मो
वर्चसा। वर्चसा वर्चस्वान्। वर्चस्वानिति वर्चस्वान्। सहस्रदाऽअ
सि। सहस्रदाऽइति सहस्र दाः। असि सहस्राय। सहस्राय त्वा।
त्वेति त्वा २६ आदित्यङ्गर्भम्। गर्भम्पयसा। पयसा सम्। सम
ङ्धि। अङ्धि सहस्रस्य। सहस्रस्य प्रतिमाम्। प्रतिमां विश्वरू
पम्। प्रतिमामिति प्रति मान्। विश्वरूपमिति विश्व। रूपम्।

133

परिवृङ्धि । वृङ्धि हरसा । हरसा मा । माभि । अभिमꣳस्थाः । मꣳस्थाः
शतायुषम् । शतायुषङ्कृणुहि । शतायुषमिति शता । आयुषम् । कृणु
हि चीयमानः । चीयमान इति चीयमानः ४२ वातस्य ध्राजिम् ध्रा
जिम्वरुणस्य । वरुणस्य नाभिम् । नाभिमश्वम् । अश्वञ्जज्ञानम् ।
जज्ञानꣳ सरिरस्य । सरिरस्य मध्ये । मध्य इति मध्ये । शिशुन्नदीना
म् । नदीनाꣳ हरिम् । हरिमद्रिबुध्नम् । अद्रिबुध्नमग्ने । अद्रिबुध्नम
मित्यद्रि । बुध्नम् । अग्ने मा । मा हिꣳसीः । हिꣳसीः परमे । परमे व्यो
मन् । व्योमन्निति वि । ओमन् ४३ अजस्रमिन्दुम् । इन्दुमरुषम् । अ
रुषम्भुरण्युम् । भुरण्युमग्निम् । अग्निमीडे । ईडे पूर्वचित्तिम् । पू
र्वचित्तिन्नमोभिः । पूर्वचित्तिमिति पूर्व । चित्तिम् । नमोभिरिति

नमः। भिः। ऋतपर्वभिः। पर्वभिर्ऋतशः। पर्वभिरितिपर्वभिः। ऋतु
शः। कल्पमानः। ऋतुशः ऽऋतुशः। कल्पमानो गाम्। गामस्मा। मा
हिऽमीः। हिऽमीरदितिम्। अदितिं विराजम्। विराजमितिविऽरा
जम्॥ १४॥ वन्नीत्वष्टः। त्वष्टुर्ब्रह्मणस्पा। ब्रह्मणस्पतानामिम्। नाभि
मविम्। अविज्ञातानाम्। जज्ञातानाऽरजसः। रजसः परस्मात्। परस्मा
दितिपरस्मात्। महीऽसाहस्त्रीम्। साहस्त्रीमसुरस्य। असुरस्य मा
याम्। मायामितिमायाम्॥ ४॥ यो अग्निः। अग्निरग्नेः। अग्नेरधि। अध्य
जायत। अजायत शोकात्पृथिव्याः। पृथिव्या ऽउत। उत वा। वा दिवः।
दिवस्परि। परीतिपरि। येन प्रजाः। प्रजा विश्वकर्मा। प्रजा इति प्रजाः।
विश्वकर्मा जजान। विश्वकर्मेति विश्व। कर्मा। जजान तम्। तमग्ने।

अग्ने हेडः। हेडः परि। परीति। ते हृणक्तु। हृणक्त्विति हृणक्तु। ४। इमा

म्मा। मा हिꣳसीः। हिꣳसीर्द्विपादम्। द्विपादम्पशुम्। द्विपदमिति

द्वि। पादम्। पशुꣳ सहस्राक्षः। सहस्राक्षो मेधाय। सहस्राक्ष ऽ इ

ति सहस्र। अक्षः। मेधाय चीयमानः। चीयमान ऽ इति चीयमानः।

मयुम्पशुम्। पशुम्मेधम्। मेधमग्ने। अग्ने जुषस्व। जुषस्व तेन।

तेन चिन्वानः। चिन्वानस्तन्वः। तन्वा नि। नि षीद। सीदेति सीद। म

युन्ते। ते शुक्। शुगृच्छतु। ऋच्छतु यम्। यन्द्विष्मः। द्विष्मस्तम्।

तन्ते। ते शुक्। शुगृच्छतु। ऋच्छत्विति ऋच्छतु। ५। एकशफं क

निक्रदम्। एकशफमित्येक। शफम्। कनि। क्रदं वाजिनम्।

वाजिनम्वाजिनेषु। वाजिनेष्विति वाजिनेषु। गौरमारण्यम्।

सं

आरण्यमनु। अनुते ते दिशामि। दिशामीमं साहस्रम् ४३ साहस्रंश

तधारम्। शतधारमुत्सम्। शतधारमिति शत धारम्। उत्सं व्य

मानम्। व्यच्यमानः सरिरस्य। व्यच्यमानमिति वि। अच्यमा

नम्। सरिरस्य मध्ये। मध्य इति मध्ये। घृतन्दुहानाम्। दुहानाम

दितिम्। अदितिञ्जनाय। जनायेति जनाय। गवयमारण्यम्। ४४

ऊर्णायुम्वरुणस्य। वरुणस्य नाभिम्। नाभिन्त्वचम्। त्वचम्पशू

नाम्। पशूनान्द्विपदाम्। द्विपदाञ्चतुष्पदाम्। द्विपदामिति

द्वि।पदाम्। चतुःपदामिति चतुः।पदाम्। त्वष्टुः प्रजानाम्। प्रजा

नाम्प्रथमम्। प्रजानामिति प्र।जानाम्। प्रथमञ्जनित्रम्। जनि

त्रमिति जनि।त्रम्। उष्ट्रमजः ४५ अजो हि। ह्यग्नेः। अग्नेरजनि

135

१३५

ष्टा। प्रजनिष्टशोकात्। शोकात्तः। सोऽअपश्यत्। अपश्यज्जनि
तारम्। जनितारमत्र। अत्रेऽत्यत्र। एतद्देवाः। देवादेवतानाम्। देव
तानामग्रम्। अग्रमायन्। आयन्तेन। तेनरोहम्। रोहमायन्। अप
स्वाप। उपमध्यामसः। मेध्यामसऽइतिमेध्यामसः। शारभन्तम् ५८ त्वम्प्र
विष्टायविष्टदाशुषः। दाशुषोहव्यान्। नःपाहि। पाहिश्रृणुधि। श्रृणुधि
धीगिरः। गिरऽइतिगिरः। रक्षातोकम्। तोकमुत। उतत्मना। त्मने
तित्मना। ५९ अपान्त्वा। त्वेमन्। एमन्त्वादधामि। सादयाम्यपान्त्वा
उ ... भस्मन्। भस्मञ्ज्योतिषि। ज्योतिष्यपने। अयनेऽर्णवे। अ
र्णवेसदने। सदनेसमुद्रे। समुद्रेसरिरे। सरिरेत्वाय। त्वायसधिषि।
सधिषिसदने। सदने। सधस्थे। सधस्थेपामो। सधस्थऽइतिसधस्थे।

मे

स्या। येनो। पुरीषं। पुरीषपाथ्यसि। पाथ्यसि पाङ्क्तेन। पाङ्क्तेनेति पाङ्क्ते।

ने ५८ अयम्पुरः। पुरो भुवः। भुवस्तस्य। तस्य प्राणः। प्राणो भौवा

यनः। भौवायनो वसन्तः। भौवायनऽइति भौव। आयनः। वसन्तः

प्राणायनः। प्राणायनो गायत्री। प्राणायनऽइति प्राण। आयनः। गा

यत्री वासन्ती। वासन्ती गायत्र्यै। गायत्र्यै गायत्रम्। गायत्रङ्गायत्रा

त्। गायत्रादुपांशुः। उपांशुरुपांशोः। उपांशुरित्युपऽअं

शुः। उपांशोस्त्रिवृत्। उपांशोरित्युपऽअंशोः। त्रिवृत्त्रिवृतः।

त्रिवृतः। त्रिवृदिति त्रि। वृत्। त्रिवृतो रथन्तरम्। त्रिवृतऽइति त्रि

वृतः। रथन्तरं वसिष्ठः। रथन्तरमिति रथम्। तरम्। वसिष्ठऽऋ

षिः। ऋषिः प्रजापतिगृहीतया। प्रजापतिगृहीतया त्वया।

136

प्रजापतिगृहीतयेतिप्रजापति। गृहीतया। त्वया। प्राणम्। गृह्णा
मि। गृह्णामिप्रजाभ्यः। प्रजाभ्यइतिप्रजाभ्यः ५४ दक्षिणा। वि
श्वकर्म्मा। विश्वकर्म्मामनः। विश्वकर्मेतिविश्व। कर्म्मा। मनोवैश्वक
र्म्मणम्। वैश्वकर्म्मणङ्ग्रीष्मः। वैश्वकर्म्मणमितिवैश्व। कर्म्मणम्। ग्री
ष्मोमानसः। मानसस्त्रिष्टुप्। त्रिष्टुब्ग्रैष्मी। त्रिष्टुबितित्रि। स्तु
प्। ग्रैष्मीत्रिष्टुभः। त्रिष्टुभःस्वारम्। त्रिस्तुभइतित्रि। स्तुभः। स्वा
रम्। स्वारात्। स्वारादन्तर्य्यामः। अन्तर्य्यामोन्तर्यामात्। अन्त
र्य्यामइत्यन्तः। यामः। अन्तर्य्यामात्पञ्चदशः। अन्तर्यामादि
त्यन्तः। यामात्। पञ्चदशः पञ्चदशः पञ्चदशः पञ्चदशा
त्। पञ्चदशः इतिपञ्च। दशः। पञ्चदशाद्बृहत्। पञ्चदशा

से

दितिपञ्च। दशान्। दशान्। बृहद्भरद्वाजः। भरद्वाजो मनः। भरद्वाजऽइ
तिभरत्। वाजः। मनऽइतिमनः ५ पश्चाद्विश्वव्यचाः। विश्वव्यचा
श्चक्षुः। विश्वव्यचाऽइतिविश्व। व्यचाः। चक्षुर्वैश्वव्यचसम्। वैश्वव्य
चसम्वर्षाः। वैश्वव्यचसमितिवैश्व। व्यचसम्। वर्षाश्चाक्षुष्यः। चा
क्षुष्याजगती। जगतीवार्षी। वार्षीजगत्याः। जगत्याऽऋक्समम्।
ऋक्सममर्क्कसमात्। ऋक्सममित्यृक्। समम्। ऋक्समाच्छु
क्रः। ऋक्समादित्यृक्। समात्। शुक्रः शुक्रात्। शुक्रात्सप्तदशः
सप्तदशः सप्तदशात्। सप्तदशऽइतिसप्त। दशः। सप्तदशाद्वै
रूपम्। सप्तदशादितिसप्त। दशात्। वैरूपञ्जमदग्निः। जमद
ग्निश्चक्षुः। जमदग्निरितिजमत्। अग्निः। चक्षुरितिचक्षुः ५।

137

(३)१५

२ दक्षनराना। उनरान्त्वः। स्वः श्रो ३ मम्। स्वरितिस्वः। श्रो ३ ऽ सौवम्।
सौवं पारन। पारकौत्सी। श्रो ३ ऋ ७ नष्टुप। अनुष्टुप्शारदी। अनल्प
वित्थव। ल्पश। पारघनष्टुभः। अनुष्टुभा ऽ पेऽम। अव स्त्व ऽ भऽत्य
नुस्त्वथाः। पेऽमैऽन। पेऽक्ष्मथ्थी। नम्थीमात्थिनः। मात्थिनः ऽ एक
विंऽशः। एकविंशा ऽ शः ऽ एकविंशाना। एकविंशत्येक। विं
शः। एकविंशा हैराजम्। एकविंशमादित्येक। विशान। वैराज
विश्वामित्रः। विश्वामित्रः श्रो ३ म्। श्रो ३ मिति। श्रो ३ म् ५२ ऽ यज्ञप
ति। उपरिमतिः। मतिल्लस्ये। नस्येबाक्। वाङ्न्ना त्वाप्ता प्ता हैम
न्तः। हैमनो बाच्यः। वाच्यः पङ्क्तिः। पङ्क्तिर्हैमन्ती। हैमन्ती पङ्क्ती।
पङ्क्तानिधनवत्। निधनवन्निधनैमः। निधनवदिति निधन। वै

सं

ते। निधनवतःऽआग्रयणाः। निधनवतः इति निधन। वतः। आग्रयणाः

आग्रयणा नः। आग्रयणा त्रिणवत्रयस्त्रिंशौ। त्रिणवत्रयस्त्रिंशौ त्रि

णवत्रयस्त्रिंशौ स्याभ्याम्। त्रिनवत्रयस्त्रिंशौ। त्रिनवत्रयस्त्रिंशौ।

त्रिणवत्रयस्त्रिंशौ स्याभ्याम्ऽशाक्वररैवते। त्रिनवत्रयस्त्रिंशौ स्याभ्यामि

ति त्रिनवत्रयस्त्रिंशाभ्याम्। शाक्वररैवते विश्वकर्म्मा। शाक्वररैव

तेऽइति शाक्वररैवते। विश्वकर्म्मा वाचम्। विश्वकर्म्मेति विश्व। क

र्म्मा। वाचं लोककृतम्। लोककृतः। ताऽइदम्। इन्द्रमितीन्द्रम्। ५७। २

138

ति क्रमवर्गपाठयोऽध्यायः ध्रुवक्षितिर्ध्रुवयोनिः। ध्रुवक्षितिरिति

ध्रुवक्षितिः। ध्रुवयोनिर्ध्रुवा। ध्रुवयोनिरिति ध्रुव। योनिः।

ध्रुवासि ध्रुवासि ध्रुवा। ध्रुवं योनिम्। योनिमासीद। आसी

द। सीदस्मा धुया। साधुयेति स्माधु। या। उत्क्वे स्म केतुम्। केतुम्प्रथम
म्। प्रथमञ्जुषाणा। जुषाणा। शिवना। अशिवना दूर्षे। अद्रषे स्माद
यतामस्। अद्रूषे। इत्यद्रूषे। मादयतामिह। इहत्ता त्वाविता १ कुला
यिनी हृतावती। हृतवती उरस्थिः। हृतवतीति हृतवती। उरस्थिः
स्योने। उरस्थिरिति उरम्स। धिः। स्योने सीद। सीद सदने। सदने पृ
थिव्याः। पृथिव्याः इति पृथिव्याः। अभि त्वा। त्वा रुद्राः। रुद्रा वसवः।
वसवो गृणन्तु। गृणन्त्विमा। इमा ब्रह्म। ब्रह्म। ब्रह्म पीपिहि।
पीपिहि सौभगाय। सौभगायेति सौभगाय २ स्वैर्दक्षैः। दक्षैर्दक्ष
पिता। दक्षपितेह। दक्षपितेति दक्ष। पिता। इह सीद। सीद देवा
नाम्। देवानाः सुम्ने। सुम्ने बृहते। बृहते रणाय। रणायेति र

मे

ण्याय। पितेवैधि। पितेवेति। पिता। इवेत्येधि सूनवे। सूनवे ऽअस्मशेवा।
शिवास्व। स्योना। स्योना स्वावेशा। स्योनेति स्यो। ऽना। स्वावेशा तन्त्वा
ऽ। स्वावेशेति स्व। आवेशा। तन्त्वा समत्। मारुविशास्त्व। विशास्वेति वि
शास्व ॥ १ ॥ पृथिव्याः पुरीषम्। पुरीषमसि। अस्य प्सः। अप्सो नाम्।
नामतान्। तन्त्वा। त्वा विश्वे। विश्वे ऽअभि। अभिगृणन्तु। गृणन्तु दे
वाः। देवाः इति देवाः। स्तोमपृष्ठा घृतवती। स्तोमपृष्ठेति स्तोम।
पृष्ठा। घृतवतीति घृत। वती। इह सीद। सीद देवानाम्। प्रजावत्।
प्रजावदस्मे। प्रजावदिति प्रजा। वत्। अस्मे द्रविणा। अस्मे ऽइत्य
स्मे। द्रविणा यजस्व। आयजस्व। यजस्वेति यजस्व ॥ ४ ॥ अदि
त्यास्त्वा। त्वा पृष्ठे। पृष्ठे सादयामि। सादयाम्यन्तरिक्षस्य। अन्तरि

139

त्तस्य यज्ञीम्। यज्ञीस्विष्टकृतीम्। विष्टकृतीन्दिशाम्। दिशाम
धिपत्नीम्। अधिपत्नीम्भुवनानाम्। अधिपत्नीमित्यधिपत्नीम्।
भुवनानामिति भुवनानाम्। ऊर्म्मिर्द्रप्सः। द्रप्सोऽपाम्। अपा
मसि। असिविश्वकर्म्माविश्वकर्म्माते। विश्वकर्मेति विश्व। क
र्म्मा। तऋषिः। ऋषिरित्यृषिः। शुक्रः शुचिः। शुचिर्ग्रैष्मौ। ग्रैष्माविति
ग्रैष्मौ। ५ सजूरृतुभिः। सजूरितिसजूः। ऋतुभिर्विधाभिः।
ऋतुभिरित्यृतुभिः। विधाभिः। विधाभिर्देवैः। विधाभिरितिविधा
भिः। देवैर्देवैः। देवैर्वयोनाधैः। वयोनाधैरग्ने। वयोनाधैरितिव
यः। नाधैः। अग्नेयत्वा। त्वावैश्वानरस्य। वैश्वानरो वसुभिः। वसु
भीरुद्रैः। वसुभिरिवसु। भिः। रुद्रैरादित्यैः। आदित्यैर्विश्वैः। वि

सं

स्वैर्देवैः। देवैरितिदेवैः ८ प्राणम्मे। मेपाहि। पाह्यपानम्। अपा
नम्व्यानम्। अपानमित्यप। आनम्। व्यानञ्चक्षुः। व्यानमितिवि
आनम्। चक्षुरुर्व्या। उर्व्यावि। विभाहि। भाहिश्रोत्रम्। श्रोत्र६ श्लो
६ कय। श्लोकयेतिश्लोकय। अपः पिन्व। पिन्वौषधीः। ओषधीर्जि
न्वजिन्वद्विपात्। द्विपादव। द्विपादितिद्वि। पात्। अवचतुष्पा
त्। चतुष्पात्पाहि। चतुःपादितिचतुः। पात्। पाहिदिवः। दि
वोवृष्टिम्। वृष्टिमेरय। एरय। एरयेतीरय ९ मूर्द्धावयः। वयः प्र
जापतिः। प्रजापतिः। प्रजापतिश्छन्दः। प्रजापतिरितिप्रजाप
तिः। छन्दः क्षत्रम्। क्षत्रम्मयन्दम्। मयन्दाविष्टम्भः। विष्टम्भोधि
तिः। अधिपतिर्विश्वकर्म्मा। अधिपतिरित्यधि। पतिः। विश्वक

140

१४०

र्म्मा। परमेष्ठी। विश्वकर्म्मेति विश्व। कर्म्मा। परमेष्ठी वत्सः। परमेष्ठी
ति परमेऽस्थि। वत्सो विवक्रम। विवलम् बृहिः। विवलमिति वि।
वलम्। बृहिर्विशालम्। विशालमृषभः। विशालमिति वि। शाल
म्। ऋषभस्तन्द्रम्। तन्द्रमृणात्त्रः। व्याघ्रो नाष्टम्। नाष्टम् छद
सिछद्रः। सिछद्रच्छदिः। छदिः पष्ठवाट्। पष्ठवाड्बृहती। पष्ठवाडि
ति पष्ठ। वाट्। बृहत्युक्षा। उक्षा ककुप्। ककुबृषभः। ऋषभः स
तोबृहती। सतोबृहत्यनड्वान्। सतोबृहतीति सतः। बृहती ८
अनड्वान्पङ्क्तिः। पङ्क्तिर्धेनुः। धेनुर्जगती। जगती त्र्यविः। त्र्यविस्त्रिष्टु
प्। त्र्यविरिति त्रि। अविः। त्रिष्टुब्दित्यवाट्। त्रिष्टुबिति त्रि। स्तुप्। दि
त्यवाड्विराट्। दित्यवाडिति दित्य। वाट्। विराड्पञ्चाविः। विराडिति

सं

विराट्। पञ्चाविर्गायत्री। पञ्चाविरितिपञ्च। अविः। गायत्रीत्रिवत्सः।
